चिद्बाधकमिति। अत्राहुः। तदभावव्याप्यवत्ताज्ञाने विशिष्टान्यत्वाच्छिन्नं
प्रतितदभावव्याप्यवत्ताज्ञानस्य प्रतिबंधकत्वं इच्छाविशिष्टत्वावच्छिन्नं प्रति
च इच्छात्वेन हेतुत्वमिति आहार्यानुमितेरंगीकारेण तदभावव्या
प्यवत्ताज्ञानसत्वेन इच्छाबलात् नापि तदभावव्याप्यवत्ताज्ञानाभावरूप
कारणाबलात् संशयानुमित्युत्पत्तिरिति बोध्यं॥ माधवाः॥ अवतिसा
ध्यकत्वमिति। नन्वेवं धूमवानाकाशादित्यादेरसंग्रहइतिवाच्यं॥ स्वरूपा
सिद्धत्वेनतन्निवेशात्। केचित्तु केवलान्वयिधर्मावच्छिन्नपक्षकत्वम

अनुमान
परिच्छेद:

तर्क. उपसंहारित्वं उदाहरणं च सर्वमनित्यं प्रमेयत्वादित्यादि। व्यतिरेकव्याप्तिग्रहप्र
४१ तिबन्धकत्वात्तद्दूषकताबीजमित्याहुः साध्येति। साध्यतावच्छेदकसंबन्धेन साध्या
धिकरणे हेतुतावच्छेदकसंबन्धेन वृत्तित्वमित्यर्थः। तेन प्रमेयवान् वाच्यत्वादेः साध्यताव्या
२.४ धूमस्य हेतोः संयोगेन वह्न्यधिकरणवृत्तित्वेऽपि कालिकेनाधिकरणेऽसत्त्वस्य कालिकादिना
वृत्तिमानत्वेऽपि च नाव्याप्तिः। साध्यतावच्छेदकावच्छिन्नाधिकरणनिष्ठाधिकरणत्व
निरूपकतावच्छेदकहेतुतावच्छेदकावच्छिन्नत्वमिति निष्कर्षः। तेन गुणकर्मान्यत्ववि
शिष्टसत्तावान् गुणत्वात् गुणे गुणकर्मान्यत्वविशिष्टसत्त्वादित्यादौ यथाश्रुते
नाव्याप्तिः॥ उपाधीति॥ असाधारणं च विरुद्धत्वाद्युपाधीनां भेदादित्यर्थः। विरु
द्धत्वज्ञाने साधारण्यत्वज्ञानेऽप्यनुमितिप्रतिबंधादिति भावः। सत्प्रतिपक्षः सा
ध्याभावसिद्धिविरोधिपरामर्शः तद्वान् हेतुः सत्प्रतिपक्षित इति येन धर्मेण त्रिसूत्रा
रूपदिति॥ अत्र साध्याभावप्रतिबंधकः परामर्शः सत्प्रतिपक्ष इत्येतावतैवम ४१
वसामञ्जस्ये पक्षेतईति संपाताप्रातमिति केचित् तत्र। पक्षविशेष्यकसाध्या
भाववद्व्याप्यवत्तापरामर्शस्य ज्ञानादिविशेष्यकसाध्यवत्ताज्ञानाविरोधि
तया पक्षविशेष्यकत्वेनाज्ञायमानस्य दस्यावश्यकत्वात्। इदं सत्प्रतिपक्षस्यानित्य

दोषत्वांगीकर्तॄणां नव्यमतेन लक्षणं बोध्यं। स्वमते तु पक्षे साध्याभावव्याप्यहेतुमत्त्वं
सत्प्रतिपक्षत्वं। अत एव उभयमतसाधारणप्रायासहेतुमेव यथाजन्यमित्यादिनोक्तव
वान्। नेदमुक्तमिति। उक्तत्वाभावव्याप्यतेऽस्त्ववदिदमिति ज्ञानमुक्तत्वरूपसाध्य
प्रतिबंधकमिति भावः। सत्प्रतिपक्षफलं तु परस्परप्रतिबंधेन परस्परानुमितिप्र
तिबंधकत्व॥ तथाहि पर्वतो वह्निमान् धूमात् पर्वतो वह्न्यभाववान् पाषाणमय
त्वादित्यादौ वह्निव्याप्यवत्तापरामर्शसत्त्वान्न वह्न्यभावानुमितिः वह्न्यभावव्याप्य
वत्तापरामर्शसत्त्वाच्च न वह्न्यनुमितेरप्युत्पत्तिः। तद्विशिष्टबुद्धित्वावच्छिन्नं प्रति तद
भावव्याप्यवत्ताज्ञानस्य प्रतिबंधकत्वादिति। निबंधकतस्तु। प्रकृतसाध्यसाध
केरत्वोः किं तत्त्वमिति जिज्ञासैव सत्प्रतिपक्षफलं। अत एव प्रकृतसाध्यहेत्वोः किं
तत्त्वमिति जिज्ञासाजनिकाव्याप्तिपक्षधर्मोपस्थितिः प्रकरणसम इति लक्षण
मप्यत्याहुः। एतच्च शब्दरत्नास्तु। तत्प्रकारकप्रत्यक्षे तदभावव्याप्यवत्ताज्ञानस्य प्र
तिबंधकत्वेऽपि अयोग्यत्वेनानुमितौ तत्प्रतिबंधकत्वस्य कल्पनात् संशय
त्वरूपपरिमाणायस्तोऽपि साध्यतदभावव्याप्यवत्तापरामर्शद्वयात् संशय
नानुमितिः संशयरूपेव जायते उभयप्रकारकत्वनिश्चयत्वायोगात् सं

तर्क
४२

तो० ९

स्यानुमितिरेव सत्प्रतिपक्षफलमिति । ननु तदभावव्याप्यवत्ताज्ञानकाले तत्प्रकार
कोपनीतज्ञानाद्यनुदयेन तत्र तत्प्रतिबंधकत्वे कृत्यन्नाभेयत्वलक्षणमिवेरपत्ल्प्रकारकत्व
किंच भवतत्प्रतिबध्यतावच्छेदकं तच्चानुमितिसाधारणमिति कथमनुमेयपरामर्श
कालेऽनुत्पत्तिविधेयकानुमितिरिति चेन्न । इच्छाद्यायत्ताप्रत्यक्षोत्पत्त्या चाक्षु
षत्वस्यपक्षनिच्छादिप्रकारके ज्ञानानुतेजकत्वोत्कर्षेन विशिष्यप्रतिबंधकतया अ
वच्छेदकत्वात् । घटस्पार्शनसामग्री सत्त्वे घटचाक्षुषोत्पत्त्यसत्त्वे च चाक्षु
षसामग्र्यां घटस्पार्शनापत्तेस्तासामिकत्रनिवेशाययोगात् । तत्तत्सामग्रीवि
शिष्टतत्तदिच्छाकूटस्योत्तेजकत्वेनाचातिगौरवमिति । न च श्रवणेच्छाघटितस्य
अनुत्तेजकत्वात्तत्रैव सत्प्रत्यक्षान्यज्ञानत्वं तत्प्रतिबध्यतावच्छेदकं तच्चानुमि
तिसाधारणमिति वाच्यं ॥ प्रत्यक्षान्यत्वज्ञानत्वयोर्मिथो विशेषणविशेष्य
भावविनिगमनाविरहेण तदपेक्षया शाब्दत्वस्यैव तत्प्रतिबध्यतावच्छेदकत्वात् ॥
परोक्षज्ञानान्तरानुत्पत्तिबलेन संकोचानन्तरस्याप्युपपत्तिरिति तत्प्रतिबंधकत्वात् ४२
स्या क्लृप्ततया न संशयानुमितौ किंचिद्बाधकमिति ॥ अत्र केचित् । इच्छाप्र
ठलेऽकत्वमिति तन्न अनुपगमेन तदभावव्याप्यवत्ताज्ञानविशिष्टान्यत्वाविष्ट

न प्रतितदभावव्याप्यवत्ताज्ञानत्वेनैकमेव प्रतिबंधकत्वं इच्छा । विरहविशिष्टं प्रतिइच्छ
४३ सेनहेतुतया कार्यकारणभावेनैव निर्वाहितस्यानुमितिसाधारणतया न संशयानु
मितिरीत्युक्तमरीतितदभावव्याप्यवत्ताज्ञानस्य विरोधिनः सत्त्वात् ॥ आहार्यानु
मितिरनुमाकरणेच्छाकाले पितदुत्पत्त्यसंभवादिति निगर्वः । अपि सिद्धिं निरूपय
ति ॥ व्याप्तिविशिष्टेति परामर्शेति । व्याप्तिर्वैशिष्ट्यप्रकारकपक्षधर्मताज्ञानं परामर्शः
पक्षव्याप्योस्तु पक्षधर्मताज्ञानविघटकत्वेन । व्याप्तिज्ञानविघटकत्वे न स्वरूपासिद्धावप्य
नतिघटकत्वेन तद्विषये व्यभिचारादावतिप्रसंगात् व्यभिचारादिज्ञानस्यापि व्याप्तिज्ञा
नबंधकतावच्छेदकधर्मे विशेषणं । परामर्शप्रतिबंधकज्ञानविषयत्वमित्युक्ते घ
टपटादेरपि समूहालंबनात्मकज्ञानविषयत्वादतिव्याप्तिरतः प्रतिबंधकता
वच्छेदकत्वपर्यंतानुधावनं । अवच्छेदकं च विषयत्वयातत्प्रतिबंधकतावच्छेद
कतापर्याप्त्यधिकरणत्वं तेन सिद्धांते हि घटकेनातिव्याप्तिरिति । स्वरूपासि
द्ध्याघटितमतमेव तत्त्वमित्यपि केचित् । सा अप्रसिद्धिः । पक्षाभावेन
रान्याह ॥ पक्षेश्वरादिना । पक्षतावच्छेदकविशिष्टपक्षहेतुतावच्छेदकाभावादि

हेतोरभावः स्वरूपासिद्धिरित्यर्थः। तेनोत्पत्तिकालीनो घटः पृथिवी गंधप्रागभावा
दीं० द्विगौनास्तीति प्रसंगः। नवाऽव्यंमस्त्वादित्यादेरपि विशिष्टस्याभावादिति केचित्तथा विशिष्टसत्ता
भावप्रतियोगिनि सत्त्वे इति व्याप्तिः। तथापि उत्पत्तिकालीनत्वरूपपरहेतुतावच्छेदकवि
तर्क० ५३ शिष्टे गंधप्रागभावस्यापि घटानन्तरेनरुक्तभावासंभवात्सत्तावच्छिन्नाभावस्य
गुणेऽसत्त्वाद्वयप्येतेनदोषः। पक्षेति। पक्षे पक्षतावच्छेदकस्याभावइत्यर्थः।
गगनीयस्वेति गगनीयकमलाप्रसिद्धेरिति। भावः। एतदुत्पत्तौ। स्वरूपासिद्धि
आश्रयासि[illegible]द्धिरिनत्वादिविशिष्टापि द्वितीयं[illegible]व्याप्यत्वासिद्धित्वमित्य
५५१ र्थः। तदु[illegible] उभयवारणायोक्तिरिति घटादिवारणाय च विशेष्यदलं धूली पट
लइति। पर्वतोयं [illegible] वह्निमान् धूली पटलादित्यादौ धूली पटलेव वह्निव्याप्यत्व
त्वेन धूमादिनिष्ठवह्निव्याप्यत्वावच्छेदकस्य सत्त्वादिति भावः। पर्वताद्यंतेतु धूम
निष्ठव्याप्यभावस्य वक्तुमपि सत्त्वात्तस्याप्यसिद्धत्वप्रसंगः साध्यसाधे
नोत्तेदेन व्या[illegible] से निर्विलगेति। ननु पर्वतः कांचनमयवह्निमान् धूम ५३
मात् एवं पर्वतो वह्निमान् कांचनमयधूमादित्यादौ साध्ये साध्यतावच्छे
दकाभावः साध्याप्रसिद्धिः। एव हेतौ हेतुतावच्छेदकस्याभावो हेत्व

प्रसिद्धिरित्येवं रूपयोः साध्याप्रसिद्धिहेत्वप्रसि[illegible]रपि आश्रयासि
द्धिवदतिरिक्तत्वमुक्तं नापि सिद्धिस्त्रिविधत्वमनुपपन्नमित्यतआह। साध्या
प्रसिद्धिरिति। वेदिबद्धत्रप्यर्थे। तथाच साध्याप्रसिद्धिर्हेत्वप्रसिद्धिरपि व्याप्य
त्वासिद्धिरित्यर्थः। हेतुतावच्छेदकावच्छिन्ने साध्यतावच्छेदकावच्छिन्नानिरू
पितनियतसामानाधिकरण्यमेव व्याप्तिः साध्यतावच्छेदकहेतुतावच्छेदक
६ स योर[illegible]प्रसिद्धौ तादृशव्याप्तेरसंभवेन तयोरपि व्याप्यत्वासिद्धावंतर्गति
रेव न आश्रयासिद्धेस्तथात्वासंभवादतिरिक्तत्वमेवेति नासिद्धेस्त्रैवि
ध्यानुपपत्तिरिति भावः। स्वरूपासिद्धाश्रयासिद्धिभिन्नत्वविशिष्टासिद्धि
त्वस्य व्याप्यत्वासिद्धित्वेगौरवान्मध्यलक्षणं तरमाह। साध्याप्रसिद्धि
रिति। अत्र पर्वतो वह्निमान्नीलधूमादित्यादौ नीलरूपविशेषण
५४ स्य संकोचकविशेषणत्वेन न नीलधूमत्वं व्याप्यतावच्छेदकं व्यभिचा
रवारकत्वात् व्याप्तिग्रहे नोपयिकत्वाच्च किन्तु धूमत्वमेव तथा। स्व
सामानाधिकरण्यव्याप्यतावच्छेदकांतराघटितधर्मस्यैव व्याप्य
तावच्छेदकत्वनियमात् धूमप्रागभावत्वसंग्रहाय स्वसमाना[illegible]

करणेति। स्वस्याऽपि स्वघटितत्वादेतदुक्ति। तदघटितत्वं च तदविष
यकप्रतीतिविषयत्वमेव। तथा च नीलधूमत्वावच्छिन्ने व्याप्यत्वाभा
व्याप्यत्वासिद्धिरेवैतदर्थः। अत एव तदुद्भावने वादिनिग्र
होऽपि। ननु व्यापकत्वघटितविशेषणत्वेन दोषः व्याप्यत्वासिद्धिरिति नि
यमे किं च निगमकमिति चेत्। तदेव। हि हेतुतावच्छेदकाव
च्छिन्नहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वा
वच्छिन्नाभावविशिष्टसाध्यतावच्छेदकावच्छिन्नसाध्यसामा
नाधिकरण्यमेव हि व्याप्तिः एवं च गुरुसमनियतल
घुधर्मेऽवच्छेदकत्वं भवति गुरौ तदन्यावादिति न्यायेन अखण्ड
रूपसंबंधरूपावच्छेदकत्वस्य गुरुधर्मेऽनंगीकारात् नी ४४
लधूमत्वावच्छिन्नसामानाधिकरणाभावप्रतियोगि

तावच्छेदकत्वस्य [illegible] प्रसिद्धि धूमसमानाधिकरणाभावप्र
तियोगितावच्छेदकत्वस्यापि तद्यागुरुत्वेन प्रतियोगितावच्छेद
कतया तादृशाभावाप्रसिद्ध्या न तेन रूपेण व्याप्तिः। इति। कि
ञ्चित् कुत्रापि वादिमान्नास्तीति प्रतीतेर्विशेषात् गुरुधर्मा
ऽपि प्रतियोगितावच्छेदकः एवं स्वसमानाधिकरणतादृशधर्मा
न्तराघटितधर्मस्यैव व्याप्यत्वावच्छेदकत्वमिति नियमस्याप्र
योजकत्वात् नीलधूमत्वमपि व्याप्यतावच्छेदकमेव अतएव नी ५५
लधूमत्वादेर्विशेषणत्वेनादोषितिकरेऽप्याह॥ नैवं तदु
द्भावने वादिनिग्रहानुपपत्तिः अन्यमते तेन रूपेण व्याप्यत्वासिद्धे
वत निग्रहोपपत्तेरिति वाच्यम्॥ धूमादिति वक्तव्ये नीलधूमा
दित्युक्तिरनुचितेति अधिकत्वा वादिनिग्रहादित्यास्तां प्रपञ्चवि

श्री

तर्क॰प्र॰ तेन॥ बाधं लक्षयति। पक्ष इति पक्षतावच्छेदकविशिष्टपक्षे साध्यतावच्छेदकाव
४५ च्छिन्नप्रतियोगिताकसाध्याभाववत्त्वमित्यर्थः। तेन कृत्स्नत्वावच्छिन्नो घटो गंध
कृ३ वान् पृथिवीत्वादित्यादौ अग्रावच्छेदेन घटे गंधाभाववत्त्वेपि नातिव्याप्तिः।
एवं महानसो पर्वतसाध्याभावस्य पर्वते सत्त्वेपि न पर्वतो वह्निमान् धूमादित्या
दौ बाधितत्वापत्तिरिति। बाधायामपक्षधर्मो हेतुरनैकान्तिको वेति निय
माद्बाधस्य प्रतिबन्धकत्वे मानाभाव इत्याशंक्य कृतेनचेति। अत्रेति ह्र
दो वह्निमान् धूमादित्यादौ अस्ति हि रेवा। हृतं पर्वबाधेनेति बाधस्य प्रतिब
न्धकत्वेनेत्यर्थः। परामर्शो जातः वह्निव्याप्यधूमवान् ह्रद इति परामर्शो जातः
बाधस्तु नेति वह्न्यभाववान् ह्रद इति बाधस्तु तत्र तथा च तत्र परामर्श
दयनास्तीत्यादर्ह्रदयत्पाबाधस्यैव दोषत्वमिति भावः। ननु वह्निव्याप्य
वत्ताज्ञानप्रतिबन्धकं ह्रदभाववत्ताज्ञानं तदभावव्याप्यवत्ताज्ञानस्य प्रति ४५
तिबन्धकत्वं कुतस्त्यम् सत्त्वादिति चेन्न। अलौकिकज्ञानत्वावच्छिन्नं प्रत्येव

६

दभावव्याप्यवत्ताज्ञानस्य विरोधितयाऽनुमितिके
कृ२ त्वहि वह्न्यभाववत्ताज्ञानोदये बाधकाभावादिति भावः। इत्यादि गमेव वह्निव्याप्यवत्ताज्ञानकालेपि प्र
लविच्छिन्नेति। दोषांतरेति। अस्तीत्यादि। असंकीर्णबाधस्थलमप्याह। आंशिका घ२
प४ नलोति। व्याप्यसत्त्वे व्यभिचारित्वमेवा रूपदोषेत्यर्थः। दोषान्तराभावमेवोपपादयति
स्तिपक्षवृत्तित्वयोरुभयोरभावनिराकरणाय रूपं त्रित्वेन स्वरूपासिद्धिरेव दोषत्वं तथा
एवं तदभाववत्ताज्ञानस्य धर्मितावच्छेदकसमानाधिकरणाः यद्यपि धर्मितावच्छेदकसामानाधिकर
ण्यापि अवच्छेदकावच्छेदेन तद्विशिष्टबुद्धौ अवच्छेदकावच्छेदेन तत्प्रकारकबुद्धौ न प्रतिबन्धकत्वं त
थैव तद्बाधः। ननु गंधव्याप्यपृथिवीत्ववत्तापरामर्शात् अवच्छेदकावच्छेदेन तदभाववत्ताज्ञानस्य विरोधि
त्वात् अवच्छेदकधर्मसामानाधिकरण्यावगाहित्वात् अप्रमेव ज्ञापमानाय घटो गंधवानित्यनुमितिः प
तिः पक्षतावच्छेदकव्यापकत्वविशिष्टसंबन्धघटितव्यापकताया अग्रहात् पक्षतावच्छेदकावच्छेदेन तदनुमि
१० स्या संबन्धेनैव व्यापकत्वेनानुमितेः तथा च बाधितत्वमित्यत आह व्यापकताघटक व्या१०
अवच्छेदकावच्छेदेनानुमितौ पक्षतावच्छेदकव्यापकत्वविशिष्टसंबन्धेन इति।
हि परामर्शस्य साध्यतावच्छेदके संबन्धघटितव्यापकत्वावगाहि अवच्छेदकावच्छेदेन व्यापकत्वावगा
वगाहिपरामर्शयोरन्यतरस्य जनकत्वेन प्रकृते गंधप्रागभावावच्छिन्नत्वविशिष्टसमवायघटितहेतुत्व न१
घनिष्ठव्यापकत्वावगाहिपरामर्शसत्त्वेपि गंधप्रागभावकालावच्छिन्नत्वविशिष्टसमवायघटितग
न्धपृथिवीत्वरूपहेतुमत्तावगाहिपरामर्शसत्त्वात् गंधप्रागभावकालावच्छेदेन घटे गंधानुमाना
गंधानुमितिर्भ्रमरूपेति न स्याभासत्वमप्रसक्तमेवेति भावः। ननु व्यभिचारज्ञानस्यानुमितिका
कृ१ रणीभूतव्याप्तिज्ञानविघटकतया परंपरयाऽनुमितिप्रतिबन्धकज्ञानविषयतया पथाव्य
भिचारादेर्हेत्वाभासत्वं तथोपाधेरपि स्यात् उपाधिज्ञानेनापि व्यभिचारज्ञानद्वारा व्याप्तिज्ञा

नविघटकत्वेनानुमितिप्रतिबंधकतावच्छेदकविषयत्वात्। तथा च पंचैव हेत्वाभासा इत्यनुपपत्तिरि
तर्क-प्र ४५ मित्यभिप्रेत्याशंकते ननु इति। एतेनैवेति पंचैवेत्यर्थः॥ तदन्यतमत्वमिति सव्यभिचाराद्यन्यतमां
तर्गतत्वमित्यर्थः॥ तस्य तत्पदार्थः॥ अनेनेत्युक्तत्वात् हेत्वाभासत्वात्॥ अत एव सव्यभिचाराद्य
न्यतमान्तर्गतत्वाभावादेव। वस्तुतस्तु सत्प्रतिपक्षादिना व्यभिचारादिघटानुमाने व्याप्तिज्ञानप्र
तिबंधाभावादनुमित्युत्पत्तेः अनुमितिकारणव्याप्तिज्ञानविघटकत्वाभावेन परमुक्तानि
रासकत्वयान हेत्वाभासत्वं एवं किंच साधनव्यापिपक्षता विघटकत्वयान तत्त्वमिति॥ वि
वादिविजयरूपैककार्यकारित्वसंगत्या हेत्वाभासानां तत्प्रसुप्तानिरूपणमारभते॥ न
न्विति॥ आचार्यमते उपाधिपदं पंकजादिपदवद्योगरूढं उपसमीपवर्तिनि स्वीयधर्म स्व
मादधातीत्युपाधिरिति योगात् तस्य निष्ठव्याप्तिरूपधर्मसंक्रामकत्वलाभः साध्यव्यापकत्वं
केवलं साध्यव्याप्यतामात्रेण दूषकत्वमिति साध्यव्यापकत्वरूपं दर्शितं यावत्साध्यसमव्या
प्तत्वघटितमेवोपाधिलक्षणं। तत्तु न समव्याप्त एवोपाधिर्विषमव्याप्तेपि व्य
भिचारोन्नायकत्वसत्त्वेन पक्षोन्नायकत्वादिरूपदूषकताया अस्य सत्त्वेन तस्याप्युपाधिता
यात्राव्याप्यापत्तेरिति साध्यव्याप्यत्वांशं परित्यज्य व्यर्थमात्रव्यापकमात्रघटितलक्षण
मादसाध्यव्यापकत्वे सतीति॥ ननु व्यापकत्वं तद्वन्निष्ठात्यन्ताभावाप्रतियोगित्वं तत्प्रतियोगि
त्वं चाव्यापकत्वं। एवं च साध्यसमानाधिकरणात्यन्ताभावाप्रतियोगित्वे सति साधनसमानाधि ४५
करणात्यन्ताभावप्रतियोगित्वमिति स्यात्। न च द्रव्यत्वादिसाध्यके संयोगाद्युपाधावव्याप्तिः। क
तिव्याप्तिश्च प्रत्यक्षत्वादिसाध्ये संयोगादौ। उभयत्र प्रतियोगिवैयधिकरण्यानवच्छेदकत्वा
न्निवेशात्। साध्यत्वसाधनत्वयोः व्यापकत्वव्याप्यत्वरूपतया व्यभिचारि[illegible]

[illegible margin note, left]

 तदसेजव२

ध्यत्वप्रकारकज्ञानविषयत्वसाधनत्वप्रकारकज्ञानविषयत्वादिना तयोर्निर्वचो भ्रमात्मकज्ञा
नमादाय प्रसिद्धिसंभवेपि यत्र न तादृशो भ्रमस्तत्रानुपपत्तिर्जागरूकैवेत्यत आह॥ तद्धी
व्यापकत्वं चेति॥ लाघवादभावागर्भं व्यापकत्वमाह॥ तदितीति कश्चित्। तत्समानाधि
करणइति॥ तद्धर्मावच्छिन्नसमानाधिकरणयावंतो यद्धर्मावच्छिन्नसमानाधि
करणत्वं। तद्धर्मावच्छिन्नेति तद्धर्मावच्छिन्नव्यापकत्वं। अत्र च यावत्सदापादा
ने वह्निमान् धूमादित्यादौ साधनाव्यापकस्य रासभादेः वह्निसमानाधिकरण
महानसत्वादिरूपकिंचिद्धर्मनिष्ठसामानाधिकरण्यनिरूपकत्वेपि न रासभा
दावतिव्याप्तिः यावत्त्वस्याव्यापकत्वात् तस्य दुर्वचत्वात् तत्समानाधिकरणत्वव्याप
कसमानाधिकरण्यनिरूपकत्वमर्थः पर्यवस्यति। तद्व्यापकत्वं तत्समानाधिकरण
त्वसमानाधिकरणाभावाप्रतियोगिसामानाधिकरण्यनिरूपकत्वं। सर्वस्यापि द्वि
त्वादिनात्यन्ताभावप्रतियोगित्वात् तद्वन्निष्ठाभावप्रतियोगितानवच्छेदकध
र्मवत्त्वं तदर्थो वाच्यः तथा च तादृशप्रतियोगितानवच्छेदकत्वमेव तदापादा[illegible]
गवारणाय यद्धर्मावच्छिन्नसमानाधिकरणत्वं तद्धर्मावच्छिन्नसमानाधिकरण
त्वत्वावच्छिन्नाभावप्रतियोगितानवच्छेदकत्वमेव तद्धर्मावच्छिन्नव्यापकत्वं। एवमव्या
पकत्वं तत्समानाधिकरणत्ववन्निष्ठाभावप्रतियोगितावच्छेदकसमानाधिकरणत्वव
कत्वबोध्यं। तद्धर्मावच्छिन्नसमानाधिकरणधर्मनिष्ठाभावप्रतियोगितावच्छेदकत्व

आर्द्रेन्धनसमानाधिकरणत्वात्

मानाधिकरण्यत्वावच्छिन्नसामानाधिकरण्यनिरूपकतावच्छेदकत्वसत्तिपद्धर्मावच्छिन्न
त.प्र. ४१ सामानाधिकरण्यधर्मनिष्ठाभावप्रतियोगितावच्छेदकसामानाधिकरण्यत्वावच्छिन्नसा
मानाधिकरण्यनिरूपकतावच्छेदकं यद्रूपं तद्धर्मावच्छिन्नः तद्धर्मावच्छिन्नसाध्यसामाना
धिकरणतद्धर्मावच्छिन्नहेतावुपाधिः। गुणकर्मान्यत्वविशिष्टसत्तावान् जातेरित्यत्र स ८
विशिष्टसत्तायाः सत्तानतिरिक्ततया सत्ताव्यापकतया साध्याव्यापकत्वप्रसंगे
प१ न द्रव्यत्वगुणकर्मान्यत्वविशिष्टसत्तादित्वादौ सत्ताव्यापकतया साधनाव्यापक
त्वप्रसंगेन च संयोगादावव्याप्तिव्याप्त्योर्वारणाय तौ तद्वत्त्वेन तद्धर्मावच्छिन्नत्वयद्धर्मा
१८ वच्छिन्नयोर्निवेशः। तद्दोषत्रयं संगमयति। यथेति। तत्रार्द्रेन्धनं तत्समानाधिकरण
त्वात् धूमसमानाधिकरणमहानसत्वादिनिष्ठाभावप्रतियोगिसामानाधिकरण्य
निरूपकत्वेन धूमव्यापकत्वमक्षतमिति भावः। अयःपिंड इति। वह्निसमानाधिकरणा
यःपिंडत्वनिष्ठाभावप्रतियोगिसामानाधिकरण्यनिरूपकत्वेन वह्निव्यापकत्वादिति
भावः। सद्धेतौ तु वह्निमान् धूमादित्यादौ तु। नैवं न वह्निव्यापकः धूमव्यापकः कश्चिदित्य
र्थः। ननु पक्षातिरिक्ते साध्यव्यापकतया यद्यद्युपाधेः दूषकत्वं तच्च महानसादेर
पि वह्निव्यापकस्य पर्वते च धूमाव्यापकस्य पक्षेतरत्वस्यैवोपाधेः संभवात् कथं न तत्रो ४१
३ ध पाधिरित्यत आह। तत्र सद्धेताविति हेतौ धूमे साध्यव्यापकीभूतत्वव्याप्यत्वात्। ननु तत्र कि
मित्यत आह। साध्यव्याप्याव्यापकस्येति। तथा च पक्षेतरत्वं वह्निव्यापकं वह्निव्याप्य
धूमव्यापकत्वादित्यनेन साध्याव्यापकत्वात् पक्षेतरत्वमुपाधिः। नि च धूमः वह्निव्याप्यः

वह्निव्यापकपक्षेतरत्वाव्याप्यत्वादित्यनेन धूम एव वह्निव्याप्यत्वं सिध्यतां व्याप्तिग्राहकस्योभयत्र
समत्वादिति वाच्यं। धूमत्वावच्छिन्नं प्रति वह्नित्वेन हेतुतया कार्यकारणभावरूपानुकूलतर्क
त्वादेव धूमे वह्निव्याप्यत्वसिद्धेः तदव्यापकत्वेन पक्षेतरत्वे वह्निव्यापकत्वानिश्चयादिति
भावः। दृष्टान्ते उपाधिलक्षणं यथा काक इति। मित्रातनयत्वपक्षत्वे साधनावच्छिन्नसाध्य
व्यापकपक्षधर्मावच्छिन्नसाध्यव्यापकयोरैक्यप्रसंगेन वक्ष्यमाणदोषासंगतेः तत्त्वे
१८ संकरप्रदर्शनाय काकपक्षं धावति। तत्र शाकपाकजत्वं। श्यामत्वे तिमुख्यपक्षव्या
पकमित्यर्थः। किं त्विति। साधनीभूतमित्रातनयत्वावच्छिन्नश्यामत्वव्यापकमित्यर्थः। विवक्षि
तमिति। मित्रातनयत्वरूपसाधनावच्छिन्नश्यामत्वव्यापकत्वात्। गौरमित्रातनयेऽव्यापि
त्वेन च मित्रातनयत्वरूपसाधनाव्यापकत्वाच्च। शाकपाकजत्वस्य लक्षणसमन्वयः। शुद्धसाध्य
व्यापके चार्द्रेन्धनादौ शुद्धसाध्यव्यापकत्वादेव सुतरां साधनावच्छिन्नसाध्यव्यापकत्वमि
ति भावः। वायुरिति। वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वादिति प्रत्यक्षस्पर्शाश्रयत्वरूप
साधनावच्छिन्नप्रत्यक्षत्वव्यापकतयाऽव्याप्तिसंगतेः तत्प्रमेयत्वपर्यंतानुधावनं। तत्स्वरूप
त्वे न तु शुद्धसाध्याव्यापकसाधनावच्छिन्नसाध्यव्यापकोऽप्यवहिर्भूतस्तस्यानोपाधि
त्वमेवेत्यत आह। किं त्विति। तथा च साधनावच्छिन्नसाध्यव्यापकस्य पक्षधर्मावच्छिन्नसाध्य
व्यापकस्यापि व्यभिचारोन्नायकत्वादिरूपदूषकताबीजसाम्येनोपाधितया तत्राव्याप्ति
ति भावः। तद्वतीति। बहिर्द्रव्यत्वावच्छिन्नप्रत्यक्षत्ववतीत्यर्थः। बहिर्द्रव्यत्वात्मत्वमानसत्व
याप्यत्वं वा। तदवच्छिन्नत्वं प्रत्यक्षत्वरूपादावपि तत्र वर्तते रूपमत्वमिति द्रव्यत्वनिवेशः। द्रव्यत्वा
वच्छिन्नप्रत्यक्षत्वमात्मादावपीति बहिर्द्रव्यनिवेशः। यथोक्तस्थले काकः श्यामो मित्रातनयत्वादित्या

नं५ लो३

तर्क. ४८

दौ॰ तथाविधेति। पक्षधर्मो भूतद्रव्यत्वावच्छिन्नेत्यर्थः। पक्षे काकादौ। असत्त्वा
दिति। इदमुपलक्षणं। प्रागभावाविनाशित्वप्रमेयत्वादित्यादौ। जन्यत्वावच्छिन्नविना
शित्वव्यापकाभावत्वोपाधौ उदासीनधर्मावच्छिन्नसाध्यव्यापकेऽव्याप्तिरित्यपि
द्रष्टव्यं। न तु साधनपक्षधर्मयोर्न तत्त्वेन निवेशः किंतु यत्किंचिद्धर्मत्वेनैवेति नो काव्या
प्तिरित्याशंकते। अथेति। केचित्तु। कः श्यामो मित्रातनयत्वादित्यादौ। कश्चिदुक्ता
पूः असत्त्वः प्रमेयत्वादित्यादौ धूमवान् वह्नेरित्यत्र शुद्धसाध्यव्यापके आर्द्रे
न्धनादौ च पक्षधर्मत्वमादाय संगतेः उपाधितापत्तेरिति। तथा च सदनुमानमात्रो
च्छेद इति भावः। नाद्य इति। वह्निमिति। महानसान्यत्वावच्छिन्नवह्निमत्त्वेन पर्वतादौ।
असत्त्वादिति। महानससत्त्वाभावसंभवादिति। स्वानधिकरणेति। स्वं उपाधित्वेना
भिमतं धूमवान् वह्नेरित्यादौ स्वं आर्द्रेन्धनं तदनधिकरणं यत् पक्षाधिकरणम
योगोलकं तद्वृत्ति द्रव्यत्वरूपधर्मावच्छिन्नधूमव्यापकीभूतत्वादार्द्रेन्धनस्य
समन्वयः। एवं स श्यामो मित्रातनयत्वादित्यादौ स्वं शाकपाकजत्वं तदनधिक
रणं यन्मित्रातनयपक्षाधिकरणं गौरो मित्रातनयः तद्वृत्तिमित्रातनयत्वरूपधर्माव
च्छिन्नश्यामत्वव्यापकत्वाच्छाकपाकजत्वमुपाधिः। वायुः प्रत्यक्षः प्रत्यक्षस्पर्शा
श्रयत्वादित्यादौ स्वं उद्भूतरूपवत्त्वं तदनधिकरणं यत् प्रत्यक्षस्पर्शाश्रयत्वाधिक

रणं घटः तद्वृत्ति बहिर्द्रव्यत्वरूपधर्मावच्छिन्नप्रत्यक्षत्वव्यापकत्वादुद्भूतरूपवत्त्वस्य
संगतिः। वह्निमान् धूमादित्यादौ तु महानससत्त्वाभावो नोपाधिः तत्र हि स्वं महानस
सत्त्वाभावः तदनधिकरणं धूमाधिकरणं महानसमेव तद्वृत्तिद्रव्यत्वरूपधर्मावच्छिन्नव
ह्निमत्त्वे महानससत्त्वाभावस्याव्याप्तिरिति ध्येयं न नु द्रव्यत्वादित्यादौ गु
णकर्मान्यत्वविशिष्टसत्ताया व्याप्तिः विशिष्टसत्तायाः सत्तानतिरेकितया सत्तानधिक
रणसाधनाधिकरणाप्रसिद्धेः एवं धूमवान् वह्नेरित्यत्रार्द्रेन्धनादीनां द्रव्यत्वादिनोपा
धितापत्तिरित्यरुचेराह। यद्वेति। स्वपदमुपाधित्वावच्छेदकपरं। मतपरं द्रव्ये चेत्
व्याप्यमानातिरिक्तत्वेपि विशिष्टसत्ताधिकरणतायाः प्रतीतिकत्वात् गुणकर्मान्य
विशिष्टसत्तात्वावच्छिन्नानधिकरणं समवायेन गुणादेव तद्वृत्तिसत्त्वादिक
पक्षधर्मावच्छिन्नद्रव्यत्वादिव्यापकत्वात् गुणकर्मान्यत्वविशिष्टसत्तायाः समन्वयः धूमवा
न् वह्नेरित्यादौ स्वपदेन द्रव्यत्वमुपादाय तु आर्द्रेन्धनत्वावच्छिन्नानधिकरणस्याप्र
करणाप्रसिद्धेः किंत्वार्द्रेन्धनलाघव। तथा चार्द्रेन्धनत्वेनैवोपाधित्वं न तु द्रव्यत्वेनेति
[illegible] व्यापकस्याभावादिघटितत्वेन गुरुतया लघुतदाहगतत्वेति। नाद्य इत्या
नोक्तदोष इति भावः। धूमवान् वह्नेः वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वात् स श्यामो मित्रातनयत्वादि
पक्षत्वेनेत्यर्थः। धूमवान् वह्नेरित्यादिषु यथाक्रमं लक्षणं संगमयन्ति। भवन्तीति सा
त्वादौ आर्द्रेन्धनोद्भूतरूपशाकपाकजत्वादिषु प्रसङ्गवारणायेति। न चैवमिति। संकेता
दिना। वह्निमान् धूमादित्यत्र महानससत्त्वाभावस्य प्रसङ्गवारणाय धर्माविच्छिन्नत्वात्। कश्चिदपि तु पाधि
एवं न च संभवतीत्यन्वयः। असङ्गता धूमादेः एवमुक्तधर्माविच्छिन्नाज्ञातः। कश्चिदपि तूपाधि
न्नं भवतीत्यर्थः। तदेवाह। न हीति। वह्निमान् धूमादित्यादौ पर्वतेतरत्वानधिकरणधूम

वत्वपर्वतत्वादिनिष्ठव्यधिकरणधर्मावच्छिन्नवह्निसमानाधिकरणः पर्वतत्वादयोपि तेन पर्व
तेतरत्वावच्छिन्नसमानाधिकरणत्वादिति पर्वतेतरत्वेऽतिव्याप्तिरिति भावः । अत एव मित्रात्
दसाधर्मावच्छिन्नसाध्यव्यापकत्वाभावादेवेत्यर्थः । तदेवाह । पक्षेति । धर्मे पर्वतत्वा
दौ न समानाधिकरण्याभावात् पर्वतेतरत्वसामानाधिकरण्याभावात् । वह्न्यनुमा
नत्वकत्वादिसाधौ पक्षे बाधेन साध्यव्यापकतया ग्रस्तत्ववह्नितरत्वादिसाधौ बाधा
न्नितत्वान्नगम्यमेवेति हृदयं । उपाधेर्दूषकताबीजं च व्यभिचारोन्नायकत्वं सत्प्र
तिपक्षोन्नायकत्वं वा । तथाहि । धूमवान्वह्नेरित्यत्र वह्नौ धूमव्यभिचारः धूमव्या
पकार्द्रेन्धनव्यभिचारित्वात् । व्यापकव्यभिचारित्वे व्याप्यव्यभिचारित्वस्यावश्यकत्वा
यो ८ त् । एवं वह्निमदयोगोलके धूमाभावात् आर्द्रेन्धनाभावात् व्यापकाभावे व्याप्याभावाव
श्यंभावादिति व्यभिचारोन्नायकत्वेन सत्प्रतिपक्षोन्नायकत्वेन वा । आर्द्रेन्धनस्यो
पाधित्वात् । नन्वपक्षधर्महेतोः साध्यव्यापकोपाधिव्यभिचारे साध्यव्यभिचा
रः साधनीयस्तथा साध्यव्याप्यहेतुव्यापकत्वे तयोरुपाधेः साध्यव्यापकत्व
मपि सिध्यति । विनिगमनाविरहात् व्याप्तिग्राहकस्योभयत्रापि साम्यादिति
वाच्यं । अनुकूलतर्कादिनोपाधेः साध्यव्यापकतानिश्चय एवोपाधेर्दूषकताबीजं चिंतन ४९
मित्यभिसंधायाह । संक्षेपश्चेति । स्वार्थपरार्थभेदेनानुमानं द्विधा तत्र स्वयं धूमादग्निमनु
माय वह्न्यर्थं प्रवर्तते तत्स्वार्थानुमानं यत्तु स्वयं वह्निमनुमाय वह्न्यर्थिनं परं प्रति पञ्चावयवं वा न्सर
क्यं प्रयुंक्ते तत्परार्थानुमानं तत्र स्वार्थानुमानं सुगमत्वादुपेक्ष्य परार्थानुमानप्रकारमेवाह । तद्यानुमान
मिति । ॥ ननु

पक्षधर्मत्वं सपक्षे सत्वं विपक्षाद्व्यावृत्तिरबाधितविषयत्वमसत्प्रति
पक्षत्वं चेत्यादि पंचरूपोपपन्नलिंगप्रतिपादकं वाक्यं न्यायस्तत्र न्यायत्वमसत्प्रति
रूपोपपन्नो धूम इति वाक्येऽतिव्याप्तेरतो न्यायत्वं विवृणोति । न्यायत्वं चे
मात्र पर्वतो वह्निमानित्यादि युक्तेनैकप्रतिज्ञादिसमुदायत्वं न्यायत्वमिति
यन्न्यायत्वमिति कथं कस्य प्रतिज्ञादिकं तत्र । न्यायस्तु पंचावयव
वाक्यमिति कृत्वा न्यायस्य समुदायत्वं इति । तेन न चैकवाक्ये न समुदायत्वं
हेत्वंशे न्यायत्वं नेति दृष्टान्तादेर्न न्यायत्वं कोऽपि । व्याप्तिसमानाधिकरणे
त्युपनयलिंगमतेः प्राचीनवीनमतेनाह । वह्निव्याप्येत्यादि । प्रति
ज्ञा साधकत्वेन हेत्वादिन्यायस्तावन्मात्रपरत्वेनोमानासंभवादिति प्रति
ज्ञाकारादिस्वरूपमाह । तत्रेति । तेषु प्रतिज्ञात्वादिकं मध्येऽस्त्येव । तत्रापि
ज्ञाता वित्यर्थ इति कश्चित् । पर्वतो वह्निमानित्युदासीनता को इति का
यान्तरघटकप्रतिज्ञायाः पर्वतो वह्निमानित्यादावतिव्याप्तिरिति न्यायघटक
प्रतिज्ञात्वापत्तिवारणाय तत्र न्याये ति । अपि च पर्वते । अवयवविभ
जकाः पंचोपाधयः प्रतिज्ञात्वहेतुत्वोदाहरणत्वोपनयत्वनिगमन
त्वभेदात् । तत्र प्राचां मते न्यायावयवानिर्दिष्टपक्षसाध्यनिर्देशः
प्रतिज्ञेति । पक्षविशेष्यकसाध्यप्रकारकबोधजनकवाक्यप्र
तिज्ञेत्यर्थः । तत्र पर्वतो वह्निमानित्युदासीनवाक्येऽतिप्रसक्तिरितत्रो

त.चिं.प्र. ५०

इदं किंचित्। एतद्भस्मादिति। अत्रोदासीनवाक्येऽतिव्याप्तिवारणाय न्यायघ
टकेति। पर्वतोऽयं धूमवदिति हेत्ववयवे पर्वतो वह्निमान् धूमादिति हेत्वव
यवत्ववारणाय चैतन्न्यायघटकेऽतिव्याप्तिः तद्वारणाय घटकेऽपि तदिति एत
न्न्यायघटके को वा धूमादिति शब्दस्त्वन्यो यथा द्रव्यं नरोऽपि। तादृशो
ति। अवयवविभाजके त्वर्थः। प्रतिज्ञादिवर्गनाम्यघटकीभूतावयवत्व
निर्वक्ति। अवयवत्वं चेति। अन्यैव प्राचीनमतं वादमाहानुकूलं चेति। नन्वे
प्रतिज्ञाद्यन्यतमत्वं प्रतिज्ञाभिन्नत्वे सति हेत्वादिभिन्नं यत्तद्भिन्नत्वं।
तत्र च प्रतिज्ञात्वं पर्वतो वह्निमानिति भाजयोः प्रत्येकपर्याप्तं वा व्यासज्य
वृत्ति वा। आद्ये प्रतिज्ञात्वावच्छिन्नप्रतियोगिताकभेदस्य तद्घ
टकेऽसत्त्वेन प्रतिज्ञैकदेशेऽतिव्याप्तिः। द्वितीये प्रतिज्ञात्वावच्छिन्नप्रतियो
गिताकभेदस्य प्रत्येकं पर्वतो वह्निमानिति भाजयोः सत्त्वेन प्रतिज्ञा
भिन्नतादृशभाजाद्वयभेदस्य च प्रतिज्ञायां सत्त्वेन वाक्ये दोषे चेन्न। प्रति
ज्ञात्वावच्छिन्नप्रतियोगिताकभेदाधिकरणतावच्छेदकपर्याप्तदवच्छिन्न
प्रतियोगिताकभेदाधिकरणतावच्छेदकपर्याप्तवच्छिन्नत्वस्य विवक्षि
तत्वात्। प्रतिज्ञात्वस्य व्यासज्यवृत्तित्वोपगमेन प्रतिज्ञैकदेशे प्र ५०
तिज्ञात्वावच्छिन्नप्रतियोगिताकभेदसत्त्वात् प्रतिज्ञात्वावच्छिन्नप्रतियो
गिताकभेदाधिकरणतावच्छेदकपर्याप्तं तदिति नागतं तदवच्छिन्नप्रति
योगिताकभेदाधिकरणतावच्छेदकेन प्रतिज्ञात्वे प्रतिज्ञान्यप्रतिज्ञैक

देशाद्यतिप्रसक्तेः। व्यासज्यवृत्त्यधिकरणताकभेदानुपगमात् प्रतिज्ञा
हेतुसमुदायो न प्रतिज्ञेति प्रतीतेः प्रतिज्ञाहेतुसमुदाये प्रतिज्ञाभेदसत्त्वात्
न प्रतिज्ञाहेतुसमुदाये प्रतिव्याप्तिः। व्यासज्यवृत्त्यवच्छिन्नाधिकरणताकभेदा
नङ्गीकारे तु प्रतिज्ञात्वावच्छिन्नभेदपर्याप्त्यधिकरणतानवच्छेदकत्वेऽस
ति प्रतिज्ञात्वावच्छिन्नाधिकरणताकभेदप्रतियोगितावच्छेदकपर्याप्त
दवच्छिन्नभेदाधिकरणतावच्छेदकपर्याप्तदवच्छिन्नत्वमन्यमवयवः। प्रति
ज्ञैकदेशवारणाय सत्यन्तं निवेश्यः। पर्वतो वह्निमानिति भाजयोः प्रत्येकं प्र
तिज्ञाभेदसत्त्वेन तादृशभागत्वस्य प्रतिज्ञात्वावच्छिन्नप्रतियोगिताक
भेदाधिकरणतावच्छेदकत्वात्। व्यासज्यवृत्त्यधिकरणताकभेदानुप
५१ गमात् प्रतिज्ञाहेतुसमुदाये प्रतिज्ञाभेदासत्त्वेन प्रतिज्ञाहेतुसमु
दायेऽतिव्याप्तिवारणाय पर्याप्तिनिवेशः। तत्र प्रतिज्ञात्वे प्रतिज्ञा
हेतुसमुदायभेदसत्त्वेन तादृशभेदप्रतियोगितावच्छेदकतादृशसमुदा
यत्वं तदवच्छिन्नभेदस्य तादृशसमुदायेऽसत्त्वे नातिव्याप्तिरिति वदन्ति
दितिप्रतिज्ञादीनां न्यायघटकत्वादितरलाभाय [illegible] इति व्या
ख्येति। अथ न्यायघटकप्रतिज्ञादिवाक्ये स्ववृत्तिवाक्यार्थबोधजनकता
वाक्येकवाक्यतया न्यायरूपमहावाक्यार्थबोधः। अवयवी तदवयवि
ज्ञानस्य महावाक्यार्थबोधहेतुत्वात्। तच्च यथा। वह्निमान् धूमा
५२ [illegible] व्याप्यधूमवान् पर्वत इति [illegible] वह्निपदस्य

धूमव्यापकवह्नौ। भवतृणार्थं धूमसंबंधव्याप्तिर्न तः। धूमव्यापकवह्निसंबंधव्या
प्तिर्न दर्शितुदाहरणार्थं द्वौ धः। वह्निव्याप्यधूमसंबंधव्याप्तिर्न तः। पर्वतः वह्नि
व्याप्यधूमवानिति धूमज्ञानस्य वह्निसंबंधव्याप्तिर्न इति प्रत्येकं ०द्वौ अः
तर्क. तत्र धूमज्ञानसाध्यं वह्निसंबंधव्याप्तिर्न पर्वतान्तिर्न धूमव्यापकवह्नि
५१ संबंधव्याप्तिर्न धूमसंबंधव्याप्तिर्न वह्निव्याप्यधूमसंबंधव्याप्तिर्न तः पर्वत तः।
वह्निव्याप्यधूमवानिति धूमज्ञानं साध्यवह्निसंबंधव्याप्तिवदस्ति वाक्यै
कवाक्यतया व्याप्त्यर्थो धः। ततः व्याप्यार्थज्ञानसहकृतेन मनसा
धूमवान् वह्निमानिति धूमविशिष्टे वह्निवैशिष्ट्यावगाहि व्याप्तिर्न्याय
घटनमानसीज्ञानं उत्पद्यते। तेन च परामर्शरूपं उत्पद्यते ततः परस्यानु
मितिः। नन्वत्र व्याप्यार्थज्ञानेनाहत्यैव परामर्शरूपं उत्पद्यतां किं तेन
व्याप्तिविशिष्टवैशिष्ट्यावगाहिज्ञानजननेनेति वाच्यम्। तस्य वाक्यि
उ सौहिं वाक्यजन्येति नान्नीसोऽकलादर्शमानावधर्मेकाकलैकितत्वेना
नुमितिरूपध्यायकपरामर्शानुत्पादकत्वात्। अन्यथा। व्याप्तिवाक्या ५१
दिवत्सापेक्षजन्यज्ञानादेवानुमितिस्वीकारापत्तेः। तथा च न्यायज
न्यज्ञानेन ततः परामर्शोपस्थापनेऽमति धूमविशिष्टे वह्निवैशि
ष्ट्यमितिमनसापरिच्छेदानंतरं परामर्शे मर्यादस्तथैव कन्यैर
ङ्गीर्ह्णी। अतएव वन्हिंतामक्तिकारेणानुमिनोतिनवस्मकारणानि

ङपरामर्शप्रयोजकव्याप्तिज्ञानजनकवाक्यत्वं न्यायत्वं। तादृश
व्याप्तिज्ञानजनकवाक्यसमवयवत्वमिति तन्द
ताकृपन्नस्ती। यद्यपि विप्रतिपत्तेः पक्षपरिग्रहे हेतुर्गिधान्या
कीक्रितत्वेन प्रत्यक्षेन्द्रियासिध्याम्भनेवाचितत्वमिति प्रतिज्ञानन्याकी
नीतथापि समवायसंबंधादिना विप्रतिपत्तेरित्यपि तत्त्वेन हेतुवा
क्यस्य निष्प्रतियोगिकान्वयबोधासमर्थत्वात् प्रतिज्ञान्यायगी।
पर्वतो वह्निमान् कुत इत्याकांक्षायां प्रतिज्ञानन्तरं हेतुपन्यासः। अय
च पर्वतो वह्निमानिति प्रतिज्ञायोऽहेज्ञानविषय व[illegible]कोलक्षणा।
धूमादित्यत्र हेतुत्वं पंचम्यर्थः। तस्य च निरूपकत्वसंबंधेन प्रतिज्ञैकदेशार्थे
ज्ञानेऽन्वयः। ज्ञायमानलिंगस्यानुमानत्वेन धूमपदं यथाश्रुतमेव।
लिंगज्ञानस्यानुमानत्वे न यतु धूमपदस्य धूमज्ञानमर्थः। इदं च धू
मतानउत्थज्ञानविषयवह्निमानिति वाक्यैकवाक्यतया प्रतिज्ञाहेतुन्या
मन्वयबोध इति केचित्। केचित्तु प्रतिज्ञायां हेतुज्ञाने नैलक्षणा
प्रत्यक्षमानाकांक्षितत्वात्। किंतु धूमपदस्य धूमज्ञाने चैव व्याप्या
ज्ञाप्यत्वे लक्षणासत्वेऽपि लक्षणास्वीकारादित्याहुः। इतरमते च
सर्वत्राहेतिकदृशेऽन्वयबोधानंगीकारेण मिष्टौ तथैव शोधः। वस्तु
तस्तु पंचम्या ज्ञाने व्याप्यत्वं चार्थः। धूमस्य च ज्ञानेऽन्वयः। स संबंधिकस्य
तेऽकदेशेऽन्वयस्वीकारादित्यलमप्रकृतविचारेण। कथमस्याग

हा १

मकत्वं व्याप्यव्यापकयोर्धर्मतयावेति। तत्र व्याप्तिदर्शनायोदाहरणप्रयोगः।
तत्र प्रथमयत्पदेन यत् बोध्यते द्वितीययत्पदेन तत्तदन्यत् बोध्यते। द्र
वीन्द्रधूमवत्समाहनसे वह्निमत्त्वमहानसान्यत्र धूमवत्तु वह्निमदिति
बोध्ये कावत्साधनाश्रयाश्रितसाध्यसम्बन्धरूपा व्याप्तिरुदाहरणेन
प्रदर्श्यते। तत्र च यत्पदद्वयं वीप्सा न तु तत्पदेऽपि। विरूपोपस्थितयोर
पि एकेन तत्पदेन परामर्शासम्भवात्। सर्वनाम्नो बुद्धिस्थवाचकत्वा
दिति। अतएव यच्छब्दोपस्थितिरिह ऊगन्नाथनाम्नोऽस्य तन्त्रद्वयकौ। नन्व
स्मारितीर्दीपमित्रुवे वसन्तो यैर्यैर्व्यतीयायपतिं वरासा। नेदं भागीदृ
इवपत्रचर्दो वर्गभावं समन्तूमिपात्तदन्त्र सख्या क्रिया न भ्रमुखी
नमूये स्मादौ चक्रुर्थे तर्हि तत्पदेऽपि वीप्सेति चेत्। यत्र प्रत्येकत्वे यत्पदे
परस्यापि तत्प्रत्येकरूपेणैव तत्पदे परामृशन्ति तत्र तत्पदेऽपि वीप्सा
यथा ससम्भूमिपालद्वयादौ। यत्र तु सामान्यरूपेणैव तत्र न तत्त
दे वीप्सा। यथा यद्यत्पाचीनं तितिह ऊही स्यादा विति न कश्चिद्दोषः। वस्तु
तस्तु व्यापकसामानाधिकरण्यरूपव्याप्तिबोधकमुदाहरणं
स्वपदपरिनिश्चयपाववार्थविशयाच न सम्भवतीति वह्निमत्तस्य धू ती०
मव्यापकवह्नेः उदाहरणं वीप्सा च तात्पर्यग्राहिका यत्तदसमानेऽप्या ५२
हतपदार्थ्यकूं तावच्छेदकव्याप्यव्यापकत्वेविविधेयेभासते तत्र तत्पदेन
वीप्सायाया यो धूमवान्सोऽग्निमानित्यत्र यत्तदसमानेऽप्याह तद्धू

मवत्पदार्थ्य तावच्छेदकीभूतधूमव्यापकत्वे विधेयेय वह्नौ भासते यत्र तु तत्पदसमभिव्या
हृतपदार्थतावच्छेदकधर्मसामानाधिकरण्यं विधेये भासते तत्र तत्पदे वीप्सा व
यासमभूमिपालेत्यादौ ... हि यत्र ... मुखी ... त्यादौ च। तत्र तत्पदसम
यासमभूमिपालेत्यादौ ... व्यापकत्वस्यावि
धेयाहृतपदार्थतावच्छेदकीभूतभूमिपालत्वकाले ... व्यापकत्वस्यावि
धेयाः भावनमन्मुखीत्वरूपविधेययोर्बोधादर्शनाभावात्। न भूमिपाल
त्वादिसामानाधिकरण्येन विधेयमानमात्रविषयकमिति तत्र तत्पद
वीप्सेति रहस्यम्। उदाहरणान्तरं यत्र धर्मताद्रश्नायापनयप्र
योगः। विशिष्टपरामर्शः स्यादित्यतिहेतुतया वस्थापनेनोदाहरणं त
गवन्यायप्रयोगाद् इति प्राचीनमतम्। तत्तु निरस्तम्। नोद्धो उदाहरणोपनय
रूपमवयवद्वयमितिबौद्धमतमप्यसमीचीनम्। ... यामाकाङ्क्षाक्रमे
णैवाभिधानात् प्रतिज्ञायाश्चापन्यासस्यावश्यकत्वात्। धूमादित्येव प्र
योगोऽनन्तु धूमवत्त्वादिति मतुपो वैयर्थ्यादिति चेन्न स्येते तेषां न
योर्हेतु ... वह्निव्याप्यधूमवत्त्वोपनयः स्यात् न तु वह्निव्याप्यधू घे ४
मवानयमिति मतुपो वैयर्थ्यादित्यवसेयम्। आर्थोपचितत्वास्तस्य
तिपक्षितत्वबोधनायापनिगमनप्रयोगः। न च बाधासत्प्रतिपक्षस्य तद
भावव्याप्यवत्ताज्ञानाभावस्य वा हेतुत्वे न तु तज्ज्ञानस्येति किन्त
नेनेति वाच्यम्। पदवगमे सति पञ्चसे भवति तत्तदभावज्ञानसाध्यमिति
नियमेन तज्ज्ञाम

स्यहेतुत्वात्। नन्वेवं घटाभावज्ञाने घटेऽपि तत्काले दर्येन तन्नापि घटाभावज्ञान
स्य कारणत्वापत्तिरिति वाच्यं परोक्षज्ञाने तादृशनियमानभ्युपगमात्। अ
त्र केचित् पक्षे साध्याभावो बाध्यः। तदभाववत्पक्षाध्यमेवेति पक्षे साध्यप्र
ताज्ञानमनुमितिहेतुरिति मायाती। तथा च सिद्धसाध्यो पक्षे पक्षे सा नं४
ध्याभावो निर्बाधवत्तत्कापि तदभावज्ञानं विनापक्षे साध्यसिद्धिप्रयम
५१ सीभवितव्या सिद्धसाधनता न स्यादिति यदवज्ञाभिमतिपन्नमेव
ति तन्न तदभावज्ञाने सति नकत्वेवेति बाध्याभावज्ञाने सति बाध्यज्ञा
नानुदये न बाधज्ञानप्रतिबंध्यानुमित्यापे गणबाधितत्वादिनो धर्मे तु तज्ज्ञा
नस्य हेतुत्वासिद्धाप्रयोगेति वदंति। केचित्तु अनुमितिप्रमापंगतानुदेश्ये
नपेऽपत्तावत्सर्वया निर्णयसाधारणी अपवाधितत्वादिज्ञानमपि हे
तुरित्याहुः। ननु तथापि निजमनेन कथमबाधितत्वादिबोधने अपद
र्थत्वादनाकांक्षत्वाच्चेति वाच्यं। तस्माद्वक्ष्यमाणत्वस्यानुवादत्वेन प्रयो
जनेऽजिज्ञासाया अभावाद्धेतत्वादिज्ञानमेव प्रयोजनं तत्परं नैव तु संगीयते।
तद्धेतुत्वलक्षणापत्यापदिचमानस बोधादिनापि तात्पर्यनिर्वाहे अकृतक
लकल्पनमयोग्यं यथा ध्वस्तोस्तीति वाक्यस्य वाक्यपरस्यापि अनुमा ५३
निकवाक्यबोधमादाय तात्पर्यनिर्वाहस्तथा प्रकृतेप्यीति विभाव्यते। तदु
मानमस्त्वप्यतद्बोध इति रहस्यमत्रानुसंधेयं॥ ॥किंचिदशुद्धितमन्नतद्बहुतं
रैकेत्याहृदि विधाय तादृशैर्देशादतत्वतत्पक्ति निवहे नाव्यमदीयबुध्याः। चेत्॥ किं
न करौकि तो चिन्मयतिक्षोभ्यायगणपः सतां नोऽनलंयदि तत्र हेतुरघुनानाजीय

मतत्त्वं च॥ श्रीसिद्धेश्वरायनमः॥ इति श्रीदीक्षितश्रीकंठशर्मविरचितायां न्यायसिद्धांतमंज
री दीपिकायामनुमानपरिच्छेदः समाप्तः॥ श्रीसिद्धेश्वरो जयति॥ श्रीगणेशाय नमः॥ अनु
माननिरूपणे नानुमानजिज्ञासा निवर्त्तते अवश्यवक्तव्यत्वमुपमानेऽस्तीत्यवस
रसंगत्योपमानं निरूप्यते॥ अथेति। अनुमाननिरूपणानंतरमित्यर्थः निरूप्यते स्व
रूपं स्वरूपप्रामाण्यादिभिर्निरूप्यते॥ निरूपणप्रतिज्ञा च शिष्यावधानाय च॥ तत्र
उपमानं निरूपणीयं तत्रोपमितिकरणत्वं स्वलक्षणं॥ तत्स्वतावच्छेदकोपमानपदवा
च्यत्वापदादावेवत्वोपाधिरूपेणानन्तच स्वरूपेणोपमितित्वस्य निवेशान्नातिदेः अतए
वोपमितित्वस्याद्विविभनोत्कीर्तनं॥ ननु उपमितित्वस्यैवोपमितिलक्षणत्वे स्वरूपात्स्वरूप
तावच्छेदकरूपोपस्थितेरुपमितिरत्तउपाधिरूपेणोपस्थितावाह। याहेति। अनुमित्यादीत्यादिपा
दाव्यशाब्दादिपरिग्रहः वह्निमानित्यादौ विशेष्याल्पतनेन गगनं शब्दवदित्यादौ श
ब्दविषयकत्वसामानाधिकरण्यप्रत्यक्षं॥ अत एव शब्दविषयकत्वसमानाधिकरण
जातिमादित्युक्तौ अनुमितित्वशाब्दत्वादेरपि तथात्वात्तद्वारणाय मनिचारीति व्याप्तत्व
र्थक् गगनं शब्दवदित्यनुमितिवृत्तित्वाभावे नित्यत्वस्य शब्दविषयकत्वव्याप्यत्वात्तदाह
यातिव्याप्यापत्या धर्मपदं विहाय जातीति। श्रावणेति। श्रावणप्रत्यक्षस्य शब्दवि
षयकत्वाव्याप्यभावेन श्रावणत्वस्य तादृशजातित्वादिति भावः। ननु परोक्षत्वं इन्द्रि
याजन्यत्वं तथा चासेन्द्रियः ज्ञानमात्रस्य मनोरूपेंद्रियजन्यतया उपमितेरपि परोक्ष

दिस्यर्थः
नेः कार्यत
दकवेन
वात्॥१

तथा हानि
व्यवस्था
पयति

त्वाभावादित्यत आह। प्रत्यक्षात्मकमुपमितिस्तथा च नयथोक्तरूपं परोक्षत्वं पेन।संभवः स्यादिति
भावः। ननु सादृश्यपिण्डधीश्चरकरणमिति एव उपमितिः सादृश्यपिण्डधीश्चरकरणं तदुच्चरितेत्यत आह करणा
तादृशपिण्डधीकार्यत्वाकारेण भावउपमानेन अवधार्यते एवं चेदशसरस उपमितेः शब्दविष
यकत्वाभावान्नोपमितित्वं शब्दविषयकत्वाभावनिश्चायिकानीतिस्तथा चासंभवदीत्याशङ्कते
नन्विति उपमितिहीतिशाब्दिकपरिच्छित्तिरेव हि उपमानप्रत्यक्षेत्यत्र करणं पक्षधीः कार्यकारणा
भावग्रहस्तु अनुमानेनैवेति शब्दविषयकत्वमपि व्याप्त्यमुपमितित्वस्य हेतुमित्तिनासंभवो हि
तिभावः। अतिदेशवाक्यार्थज्ञानं करणं सादृश्यज्ञानं कल्पनं सहकारि अतिदेशवाक्यार्थस्म ६५
तिर्व्यापारः उपमितिः फलमिति सम्प्रदायमतं वदति आवश्यकत्वेन कृत्वा सादृश्यज्ञानं करणं अ
तिदेशवाक्यार्थस्मृतिर्व्यापारः उपमितिः फलमिति नवीनमतेनाह। सादृश्यज्ञानादिति तथा
च सादृश्यज्ञानं करणमिति भावः। प्रत्यक्षादावंतर्भावासंभवात् परिशेषेणतस्या अतिरिक्त
त्वं व्यवस्थापयितुं प्रमाणान्तराभावमाशङ्क्य तन्न खण्डयति प्रत्यक्षमिति पद्याय प्रत्यक्षसाम्यमनन्ये
मानसमपि निर्विघ्नमेव इदं वचनमानसमितिएवमुपनीतो अनुत्तः तत्र आपित व्यापार विर ॥५
हि पिता यमानत्वादिति हेतुरनुपपत्त्या पृथक् मानसं निराकृतं गमकत्वविरहे न्यायेन वा तत्प्रत्यक्ष त्यै ५
पदं मानसान्यप्रत्यक्षपरमिति ज्ञेयं ततः मानसात् अन्नु हेयमनत्वात् उपमितित्वं ५४
तरं उपमितौ मानमेव अनु अवशोरपा मानसानन्तरं स्युतादृशप्रत्यक्षत्वं तथा यात्मानस
त्वं तस्याइत्यर्थः। अन्नु नवीनादरेत्याह। अन्यथेति। अन्नु नवानापरत्वात्पर्थः अन्नापि

नोमीत्यनु व्यवसायस्य मानसानंतरमनुदयेतानुमितेरतिरिक्तत्वासिद्धेः अनुत्वा
पत्तापेत्तस्या अव्यतिरिक्तत्वं विज्ञायेति तिभावः। मातिरूनानांहीनासिद्धिपदार्थपद
धर्मताहनुपरिग्रहः। यत्राभावादित्ति शाब्दबोधसामान्येपदजन्यपदार्थोपस्थितेर्हे
तुत्तपातत्त्वं अका लेचोपमितित्वं तुत्पानोपमित्ते स्तद्रूपत्वमित्तिभावः। ननु गोसादृशो
ग्वयपदवाच्य इत्याकारकं गोसदृशमाश्रयेगवयपदवाच्यत्वावगाहिज्ञानमुप
मानं ततश्च गोसादृश्यावच्छिन्नेगवयपदवाच्यत्वावगाहिनीउपमितिरुत्पद्यते तत्र
च गवयत्वाविशिष्टोपस्थापकपदाभावेपि गोसादृश्यविशिष्टोपस्थापकपदसत्वात्
शाब्दबोधे त्वबाधकाभाव इत्यत उपमित्याकारं परिच्छिनत्ति। उपमित्याविति। अयमि
ति गवयपदस्यार्थः। यथा श्रुततद्रूपमित्तिः इदं त्वावच्छेदेन गवयपदवाच्यत्वावगाहित्वेन
गवयत्वावच्छेदेन गवयपदवाच्यत्वावगाहनादित्याशङ्क्य विरोधात्। अयमर्थः। पत्तिं
गृहीत्वा कश्चिद् व्यवहारप्रवर्तनीयेति शेषज्ञानाद्यो नाचित्ति। ननु गोसादृश्यावच्छेदेनगवयपदवा
च्यत्वावगाहनान्वित्ति विज्ञाने विपरीताते नान्वयः। तस्य गोसादृश्यस्य गोरवेनगवय
त्वापेक्षया गौरवेणात्तदन्यच्छेदकत्वात् गवयपदवाच्यत्वानवच्छेदकत्वात्। ननु गवय
त्वस्यावच्छेदकत्वे तदवच्छेदेन गवयपदवाच्यत्वस्यापत्तौ स्यात् उपपन्नये आमित्यत तदं
स्यैकरणी उपमितिमह अन्वमित्तिदर्पे या गोसादृश्यस्य गवयत्वापदरूपाकारुचेपि

अवच्छेदकत्वकल्पनं लाघवात् धर्मिकल्पनातो धर्मकल्पनाया लघीयस्त्वादिति न्यायाद् इ
त्यत आह। अन्यथेति। गोसादृश्यस्यावच्छेदकत्वे कल्पनागौरवं प्रमाणान्तरात् तदवगते रि
त्यर्थः॥ व्यवहारः शाब्दबोधः शाब्दप्रयोगो वा न प्रतीतम्। तं शक्तिर्यस्येत्यर्थः। शक्तिः इ
१८ ५५ नमस्त्वावकत्व एतस्यादितियावत्। गोसादृश्यावच्छेदेनैव गवयपदवाच्यत्वावगाहनात् अ
तिदेशवाक्यार्थज्ञानोत्तरोत्पन्नज्ञानात् गवय इति पदात् शाब्दबोधोऽनुभवसिद्धो वि
सायकत्ते त्वत्प्रकारकशाब्दबोधे तत्प्रकारकशक्तिग्रहस्यैव हेतुतया गवयत्वप्रकारकश
क्तिग्रहाभावात्। एवं व्यवहारं प्रति व्यवहर्तव्यज्ञानस्य हेतुतया तादृशशाब्दबोधाभा
वादनुचरत्तोदृशव्यवहारानुपपत्तिश्चेति गवयत्वावच्छेदेनैव गवयपदवाच्यत्वाव
गाहि ज्ञानमुपेयं। तच्च गवयत्वविशिष्टोपस्थापकपदाभावान्न शाब्दमतस्तदुपमितिः
एतेन शाब्दनिराकरणप्रस्तावे गवयपदवाच्यतावच्छेदकत्वं गवयत्वस्य गोसादृश्य
स्यवेति किंचारस्य प्रकृतानुपयोगित्वं अयं उपमितिप्रकारप्रदर्शनस्यानौचित्यादित्यपा
स्तां। उक्तमहंकत्वादृश्यैव सर्वसामंजस्यादिति ध्येयं नापि स्मृतिरित्याह। नवेति। अनुभ ५५
वागोचरस्य स्मृत्यगोचरत्वादिति भावः। अतः अयमश्वादिषु अतन्मवासंभवात् अतिरिक्तै
प्रत्यक्ष २ व अनुमित्यादिभ्योऽतिरिक्तैव। इयं अयं गवयपदवाच्य इति प्रतीतिः। अयं गवयपदवा ॥२॥
च्य इति प्रतीतिः यत्पदादिप्रमितिभ्योऽपि घटेतताद्विरुद्धधर्मवत्त्वादित्यनुमानं बोध्यं सं

अयो १ ... इतोविरुद्धधर्मकेतरतोऽपि घटते यथा ... इत्यादि। १

प्रदायमतं आह। तस्याः करणमिति। तत्सादृश्यविशिष्टे सादृश्याश्रये। गोसदृशो गवयपद
वाच्य इति वाक्यार्थानुभव इत्यर्थः। तत्स्मृतिः तादृशवाक्यार्थस्मृतिः। द्वारं व्यापारः। गवयत्वेति।
अयं गोसदृश इत्याकारकसादृश्यविनिश्चय अतिदेशवाक्यार्थानुभावकरूपोपमानसा
हकारीत्यर्थः। ननु सादृश्यकरणकज्ञानवारवैधर्म्यकरणकज्ञानस्याप्युपमितित्वापत्तेरि
त्यत आह। एतच्चेति। एतत् सादृश्यज्ञानं वैधर्म्यज्ञानजन्योपमितितिव्युत्पादपत्ति। यथेति।
उष्ट्रार्थेति जन्यादिविधर्मकरणवतीर्थी वाति करूवाक्यार्थस्मरणादित्यर्थः। एवं भ
वतीति। एवं जन्यादिविधर्मत्वादवत्वेन इदानीं ज्ञायत्वेनेति शेषः इत्युक्तदितेरत्ति। करण
ज्ञा नेर इत्युक्तरित्तेत्यर्थः। ननु वैधर्म्यज्ञानजन्यस्योपमितित्वस्वीकारे सादृश्यवैधर्म्यज्ञानयोः पर
स्परजन्योपमितौ व्यभिचारेणाकथं करणत्वसंभव इत्यत आह। तस्मादिति। सादृश्यज्ञा
नजन्योपमितित्वे वैधर्म्यज्ञानजन्योपमितेरप्यनुभवसिद्धतयाऽप्यलापानर्हत्वादि
त्यर्थः। यत्किंचिदिति। सादृश्यवैधर्म्यान्यतरविशिष्टेत्यर्थः॥ विशिष्यविशेषधर्मपु
रस्कारेण अपरिचितेति अतिरोहितशक्तिकपदवाच्यत्वरूपेत्यर्थः गवयपदवाच्यं किंचिदस्तीति
सामान्यतः शक्तिनिर्णयात्। विशिष्यतु। अत एव सामान्यधर्मप्रकारकज्ञानस्यावांतरधर्मप्रका
रकजिज्ञासां प्रतिहेतुत्वपाविशेषधर्मप्रकारकजिज्ञासाबोधकरूपदर्शी गवय इति प्रश्नोऽप्युपपद्यत इ
ति बोध्यं। करणमिति। उपमितिसामान्ये सादृश्यवैधर्म्यान्यतरधर्मितावच्छेदके। विशिष्यानिता तिइविशेष इत्यर्थः १

तिशक्तावच्छेदकपदवाच्यत्वरूपवाक्यार्थानुभवः करणमित्यर्थः॥ विसदृशोपमितिप्रसंगं दूष
तत्राह॥ केचित्तु धर्मविशिष्टे इति। गवयत्वादिरूपधर्मावच्छिन्नत्यर्थः। तद्वत्ताधीरिति यावत्। दृशे
१५ पदवाच्यत्वानुभवस्तद्वत्ताधीरित्यर्थः। गवयत्वादिविशिष्टसादृश्यधीरिति यावत्। ननु ए
कधर्मविशिष्टे सादृश्यज्ञाने धर्मान्तरविशिष्टे पदवाच्यत्वावगाह्युपमितिः कुतो नेत्यत आह भावप्र
देन सादृश्यज्ञानं तद्धर्मावच्छेदेनैव पदवाच्यत्वावगाहिन्युपमितिः इत्युपपत्तिः। एवं च गवयत्वादि
विशिष्टरूप। लघुधर्मानुपस्थितौ यदा गुरुधर्मविशिष्ट एव सादृश्यज्ञानं। तदा तदवच्छेदेनैव प
दवाच्यत्वावगाहिन्युपमितिः स्यादित्यत्रेष्टापत्तिमाह। यदा चेति। लघुधर्मं गवयत्वादि। रूपत्ता
तो। गुरुधर्मेति विलक्षणसंस्थानवत्त्वरूपधर्मविशिष्टेत्यर्थः। सादृश्याद्युपादपदात्त्वे
धर्मपरिग्रहः। तदवच्छेदेनैव विलक्षणसंस्थानवत्त्वरूपगुरुधर्मावच्छेदेनैव वाच्यताग्रहः
गवयपदवाच्यताग्रहः॥ सगुरुधर्मविशिष्टे पदवाच्यत्वग्रहः बाधादिति। लघुधर्मोपस्थि ५८
तो लघुरूपधर्मेणावच्छिन्नताग्रहो न भवति गुरुधर्मत्वेन कारणस्यानुपपत्तेः। लघुधर्मवि
शिष्ट एव पदवाच्यत्वावगाहिज्ञानमुत्पद्यते गुरुधर्मविशिष्टविषयकज्ञानत्वप्रामाण्यज्ञानं ॥३॥
तदनंतरजायत इति भावः॥ केचित्तु लघुधर्मानुपस्थितौ सादृश्याद्यवच्छेदेनापि पदवाच्य
त्वावगाहनात् सादृश्यगौरवेणावच्छेदकमित्युक्तमयुक्तमित्यत आह। यदा चेति गुरुधर्म ति१
विशिष्टसादृश्यादिधर्मविशिष्टतदवच्छेदेनैव सादृश्यावच्छेदेनैवेत्यर्थः इति यावद् दोतत
सत्वात्गुरुधर्मविशिष्ट एव सादृश्यज्ञानं तावतैतस्यासंगतत्वापत्तेः। गोसदृशो गोसदृश

वि१

इति सादृश्यज्ञानस्यासंभवादिति दिक्॥ ननु संभवत्येवं यदनुमानस्य प्रामाण्यं तन्नु
मानाधीनशक्तिग्रहस्वरूपत्वाद्वाक्यार्थानुभवरूपोपमानस्य तदेव तु न प्रामाण्यमात्रे एव
पंचनोपमानशब्दयोः संपातिरहितं चत्वारि प्रमाणानीति तथाहि वन्यादिगोचरप्रत्यक्षे
कृ आप्यवक्तापर्यायशब्दरूपविशेषदर्शनमस्तु वयं तत्त्वत्रैवोपपत्तेर्नानुमानस्य प्रमाण
त्वं नचान्वयव्याप्तिज्ञानशक्तेः साध्यज्ञानस्यादृश्यवत्त्वात्तद्वन्यादिविषयकोपनीतभानो
पपत्तावपि इतरभेदज्ञानशब्दस्य न तादृशं तरस्यापकीर्तनं तावत्प्रतियोगिपृथिवीत्व
वत्तीपृथिवीत्यादिव्याप्ति रेवकेवलव्यतिरेकिज्ञानकाले इतरभेदज्ञानाभावात्तदुपनीतभानासं
भवेन तत्र प्रामितं तरस्वीकरआवश्यकमिति वाच्यम् अन्योन्याभावत्वादिसामान्यलक्षणासंनि
कर्षवशादेवेतरभेदगोचरप्रत्यक्षोपपत्तेः। एवं शब्दस्यानपेतित्वात्प्रत्यक्षानंतरं यत्कृत्ये
त्वानयनत्वपादिनां परस्परसंसर्गविषयकविलक्षणप्रमितिरसिद्धा। शाब्दबोधस्तत्त्वे
पदार्थोपस्थितेरावश्यकतया तादृशमानसोपनीतभानेनैवनिर्वाहात्तत्र न च संसर्गोप
स्थितेरन्येयत्वात्कथं संसर्गबोधइतिवाच्यं। बोधाभावादिबलात्तस्यापि संसर्गतया नो
निबाधाद्यभावात्तद्वत्तदुपनीतभानं प्रतितदुपनायकज्ञानत्वेन कारणत्वाभावाद्व्यभिचार
इतिवाच्यं। सांसर्गिकविषयताभिन्नायोग्यविषयतायास्तज्जन्यतावच्छेदकत्वेनाव्यभिचारा
भावात्तत्प्रामितं तरस्वीकारतन्निपामकबहुतरकार्यकारणभावकल्पनापत्त्या सांसर्गि

कविषयतावच्छेदकनिवेशेऽनवस्थापत्तिस्फुरत्वोपयोगस्य ज्ञानस्य शाब्दसामान्ये उक्ततया सं
ग विषयत्वस्योपयोगज्ञानत्वात् सांसर्गिकविषयतावच्छेदकनिवेशेऽपि दातव्याभावाच्च एवं गवयत्व
विशिष्टसादृश्यज्ञानसहकृतगोसदृशो गवयपदवाच्य इति ज्ञानात्तेरोत्पन्नमयं गवयपदवा
च्य इति ज्ञानमप्युपनीतभानमेव इति कथमेतदिति चेन्न । अत्राहुः लिङ्गपरामर्शोत्तरोत्पन्न
व्याप्तिमुत्तरमनुमितिनोमित्यनुव्यवसायप्रस्तावदनुभवसिद्धत्वाद्विषयितावच्छेदकत्वा
ज्ञानविशेषे वा वच्छेदकतया अनुमानस्य प्रमाणान्तरत्वं । अथवा अनुमानप्रवृत्ता घटवान्
इत्यनुमित्यनन्तरं प्रवृत्तवाक्यमनुमितोमीति अनुव्यवसायापत्तौ वक्ति निष्ठविषयत्वाभावा
विशेषहेतुविषयताविशेषउपगन्तव्यः । यदन्वयात्तदनन्तरं नतादृशानुव्यवसायः एवं चा
नुमितोमीत्यनुव्यवसायस्य तादृशविषयताविशेषविषयकत्वेनोपपत्तेस्तस्यानुमिति
त्वरूपजातिस्वीकारे सातिकुतस्तदवच्छिन्नकारणतया प्रमाणान्तरत्वमिति चेन्न । लिङ्गप
रामर्शाविरहे तादृशविषयताकज्ञानानुत्पत्त्या तदवच्छिन्नकारणतयैव तस्य प्रमाणान्तरत्व
मिति । वस्तुतस्तु अनुमिनोमीत्यनुव्यवसायस्य तादृशविषयतामात्रविषयकत्वे आपत्ति
शाब्दबोधोत्तरमपि तादृशानुव्यवसायापत्तेः अनुमितित्वापत्तिः शाब्दबोधादिघटितादृवि
षयतायाः एकत्वात् । अनुमितित्वजातिस्वीकारे तु आपत्त्यादिकं तादृशजातिसत्त्वान्नीति
तादृशानुव्यवसायापत्तिरिति तदवच्छिन्नकारणतयाऽनुमानस्य प्रमाणान्तरत्वमाव
श्यकमेव । एवं शाब्दव्यवहारानन्तरं जायमाने ज्ञानेऽनुमितिशाब्दयामित्यनुव्यवसायोत्प

त्पत्तिद्वयोत्पत्तिसिद्धशाब्दत्वाख्यजातिविशेषावच्छिन्नकारणतया शब्दस्यापि सिद्धिः । एवमु
पमिनोमीत्यनुव्यवसायवशादुपमानस्यापि प्रमाणान्तरत्वमिति । नन्वाप्यनुमितित्वा
दितत्कापित्तप्रत्यक्षत्वव्याप्यमेवास्तु तदवच्छिन्नकारणस्यप्रत्यक्षप्रमाणान्तरत्वं अथवानुमित्या
देर्मानसत्वं तदुत्तरं साक्षात्कारो मातिपन्नव्यवसायापत्तिः अनुमित्यादेः साक्षात्कारत्वादिति
चेन्न । लौकिकविषयता शालिसाक्षात्कारत्वस्यैव तादृशप्रतीतिविषयत्वात् । अत एव वस्तुर
सिद्धदहनादित्याद्युपनीतभानानन्तरं धूमं पश्यामि न सोऽरं जानामीति सार्वजनीनः प्रत्ययः संगच्छते
तथा च लौकिकविषयतायाः साक्षात्कारत्वव्यञ्जकतया नानुमित्यादेस्तरसाक्षात्कारो मातिप्र
त्ययः । अथैवं तत्र प्रत्यक्षत्वसत्त्वेमानाभावः साक्षात्कारो मातिप्रत्ययाभावेन प्रत्यक्षत्वस्य
अप्रयोजकत्वादनुमानस्यापि मानत्वेन पृथक्प्रमाणत्वात् । अत्र केचित् । अनुमितित्वा
देः प्रत्यक्षत्वव्याप्यते लाघवमेव । तथाहि अनुमितिसामग्रीकाले प्रत्यक्षसामग्रीकाले प्रत्य
क्षवारणाय अनुमितिसामग्र्याः प्रत्यक्षप्रतिबन्धकत्वं कल्पनीयं प्रत्यक्षत्वव्याप्यत्वे त्वनु
मित्यात्मकप्रत्यक्षस्यैवोत्पत्त्या तदकल्पनप्रयुक्तलाघवमनुभवमेवेति तदसत् । अनुमि
तित्वस्य चाक्षुषत्वव्याप्यत्वे चाक्षुषपरामर्शोत्तरोत्पन्नज्ञानेऽनुमितित्वापत्तेः चाक्षुषत्वस्य
न व्याप्यत्वमतस्त्वावतां परस्परव्यभिचारिणोस्तयोरेकत्र समावेशे सांकर्यापत्तेरिति
चाक्षुषत्वादिविरुद्धं तदुपगन्तव्यं चानुमितिसामग्रीकाले चाक्षुषादिवारणाय चाक्षुषादिकं
प्रति अनुमितिसामग्र्याः प्रतिबन्धकत्वं कल्पनीयं एवं सामान्यतः प्रत्यक्षं प्रत्यनुमितिसामग्र्याः
प्रतिबन्धकत्वं मयापि न कल्पनीयमिति कृतः शिंवानलम् अनुमितित्वादेर्मानसत्वव्याप्य

त्वमेवास्तां अनुमितिसामग्रीकाले मनुस्सवारणाय मानसं प्रत्यनुमितिसामग्र्याः प्रतिबंधक
त्वकल्पने गौरवात् अन्यमते तु अनुमित्यात्मकस्य लोपो वा त्वादिनत्वे शापतेः न च एवमनुमितिसाम
ग्रीकाले घटादिमानसवारणाय तत्र प्रतिबंधकत्वस्यावश्यकतया घटादिकमानसे निवेशप्रमा
न सत्वमेवं तत्प्रतिबध्यतावच्छेदकमिति वाच्यं घटादिमानसे ज्ञानत्वमिति ध्यानानुवृत्तेज्ञ
कल्पानुरोधेन विषयनिवेशे च प्रतिबध्यप्रतिबंधकभावकल्पनस्यावश्यकत्वात् एवं शा
ब्दादिस्थलेपीति मेवं घटादिचाक्षुषसामग्रीकाले वह्न्यनुमितिसानुदयेन चाक्षुषसामग्र्याः
मानसं प्रति प्रतिबंधकतायां घटादिचाक्षुषसामग्रीकालेपि वह्न्यनुमित्युत्पत्तेरनुमित्य
न्यमानसत्वमेव चाक्षुषसामग्रीप्रतिबध्यतावच्छेदकमेव तावाच्यमिति अनुमितित्व
त्वनिवेशे गौरवात् एवमनुमितिसामग्रीकाले अनुमित्यन्यमानसवारणाय अनुमि
त्यन्यमानसत्वमनुमितिसामग्रीप्रतिबध्यतावच्छेदकमुपेयमित्यनुमितिसाम
ग्र्याः प्रतिबंधकत्वकल्पनं आवश्यकमनुमित्यन्यत्वानिवेशे गौरवं पुनरधिकं एवं शा
ब्दोपमितिस्थले शाब्दान्यत्वोपमित्यन्यत्वनिवेशे गौरवमिति तेषां मानसांतर्भाव इ
ति संक्षेपः कृत्वा श्रमं प्रमाणानीति दिक् ॥ इति श्रीदीक्षितश्रीकंठशर्मविरचितायां न्या ५८
यसिद्धांतमंजरीदीपिकायां उपमानपरिच्छेदः समाप्तः ॥ श्री ॥ छ ॥ श्री ॥